देव-गोष्ठी

हस्त लिखित


प्रतियोगिता - सम्मेलनम्.

रविवासर-प्रतिपदायां मई मासस्यारम्भे
संस्कृतोत्साहिन्या 'प्रतियोगिता सम्मेलनं'
सम्मेलयिष्यते.

विषय-सूचिः

	पृष्ठसं.
प्रभुप्रार्थना ले. कश्चित्	२
कोऽसि त्वम्? ले. विनोदचन्द्रः	३-६
सुभाषिते	६.
आर्यसमाजः ले. विनायकराव	७-११
ईश-स्मरणम् ले. 'मधुर'	१२
कुलपते! ले. रामनाथ	१३-१४
नूपुर-चरितम् ले. बालकृष्ण	१५-१९
सुभाषितम्	१९
अमृत-वाणी	२०-२१
पराजयस्य-विजयः ले. गुरुदेव	२२-२९
हा! श्यामसिंह शर्मन्!	३०
आर्यसमाजस्य राष्ट्रिय-आर्थिक सम्बन्धाः ले. भूषणः	३१-३५
प्रेम ले. सुरेशचन्द्र	३६-३८
पत्रम् ले. कश्चित्	३९-४२.
भस्मभूतिभूतम् ले. भूषणः	४४-५१
सम्पादकीयम्	५२-५८.
राष्ट्रिय महासभा.	
सिक्खानां राजनीतौ भागः.	
दक्षिण अफ्रीका वासिनः भारतीयाः	

	पृष्ठसं.
चीन जापान संग्राम	
आयर्लैण्डस्य क्रान्तिः	
गुरुकुलीयाः समाचाराः	५८-६६
ऋतुः	
गुरुकुले नूतनानि परिवर्तनानि	
स्वास्थ्यम्	
क्रीडाः	५८
नम्र निवेदनम्	६०



वर्ष १० सं १९८६ ५७ ;२	सम्पादक: सुरेशचन्द्र: सरकुलोत्साहित्या प्रकाशिता	अङ्क १, मास वैशाख. ति० २१-१-८६

औदास्यावग्रहेण ग्लपित दश दिशो घोर घर्माभ भात:
आशातूप: कूलोऽयं पुनरपि सरसे प्रेमपीयूषपूर्या।
तृप्ता स्वान्ता: समन्तात् सहृदय शिखिन: प्रीणिता वायवाणी.
जीयाच्चित्यं जगत्यां सरल सरसी सूक्तिदा देवगोष्ठी ॥

श्री सत्यपाल:
'उत्सुक'

प्रभु - प्रार्थना.

त्वमेव स्वामिन् शरणो मदीयः सुख प्रदाता जगतश्च रक्षिता ।
क्वाहं व्रजेयं शरणं गृहीतुं नान्योऽस्ति कश्चिद्धितचिन्तको मे ॥.
जपामि मन्त्रं तव रात्रिवासरं पादौ पवित्रौ शिरसा प्रणम्य ।.
दयस्व स्वामिन् मयि प्राप्त कष्टे मां हे नयस्नाथ विपत्तिसिन्धोः ॥

अंगीकुरुष्वाद्य ममोपहारं भक्त्या समानीतमिमं हि तुच्छम् ।
प्रभो कृपस्वात्र तवास्मि दीनः द्वारे स्थितोऽहं मुहुरानुयामि ॥.

ले॰ 'कश्चित्'.

नोट -: 'प्रभुजी मेरे तुम ही एक॰' इत्यवलम्ब्य.

"कोऽस्ति तव"?

कोऽस्ति तव?

कोऽस्ति तव स्वजनः?

सर्वं परित्यज्य पूर्वं तावदिदमेव जानीहि यत्कोऽस्ति तव? एते ये खलु विविधविचित्रचाकचक्येन तव मनो हर्तुं समागच्छन्ति ते खलु असमर्थाः सन्ति तव हृदयाय शान्तिं प्रदातुम्। येऽनाहूता अतिथयो विविधवेषाभरणालङ्कृतदेहास्तव परितो भ्रमन्ति ते तु तव स्वकीया जना इति भ्रमं मा कृथाः। ते तु त्वत्तो दूरं योजनशतादपि दूरं वर्तन्ते। ये खलु मनोहराभिराकृतिभिर्वचनावलिभिश्च तव चेतः प्रमोदयितुं प्रयतन्ते। हन्त! तेषां हस्तेषु नास्त्यसौ दीपको यः खलु प्रकाशयेदन्धकारावृतं पन्थानं सर्वदा तुभ्यमेव। किं त्वमिदं जानासि यत् खलु मनोहराभिर्वक्तृताभिः सम्मानं सम्मोहयन्ति ते तव जीवनतरणीं तारयिष्यन्ति भवसागरादस्मादिति। ये खलु सभासमाजेषु नेतारः सन्ति किं त्वं मन्यसे यत् ममता-वशं त्वदर्थं समागमिष्यन्ति? किं त्वमनुभवसि यत्ते [illegible]

येनवत् त्वमन्युपरि ते तव
उपकारं स्मरन् उपकरिष्यति
यदा त्वैते सहायकास्त्वया
सह राजन चलन्ति तदा
य कश्चित् तूष्णीं भूय
त्वामवलोक्य गच्छति
स्यादसौ तव बन्धुः।
यदा मण्डपेषु नृत्यगान-
परायणेषु तव सहायकेषु
यो भोजनं जनशून्याया
दिशायास्त्वां निरीक्षमाणस्तिष्ठ
मानसस्तिष्ठति स एव
बन्धुर्भवेदिति संभावनाऽस्ति।
य. समुद्रादिति मुक्ताफल
मिव शालीनतयानयनाय
तुभ्यं स्निह्यन् दूरे वसति.
स २० । त्वा दीपनाय

तपति, तव तप क्लेशा-
नस्थास्य मुदा पश्यति
निश्चयेनासौ तवास्ति।
विपत्तावागते यदा तव
पुण्यभाजता· शकुना
स्वार्थसाधनाभिधानाव-
शपक कार्यविशारद् स्वकीयात्
नीडात् प्रति उड्डीयते, तदा
यस्तव निकटेऽवतिष्ठते
स एव तवास्ति।
ग्रीष्मास्विन्दुपशान्तिषु यदा
आशामयोऽपि तव स्वत्व·
पुलीयते तदा त्वामवस्तान
यौतन पतंग् स्मागच्छति,
स एव तवास्ति।

।यदा सर्वतो निराशता व्याकुली
करोति, दुःखादयश्च विकली
करोति, न कोऽपि सहायकः
समागच्छति। यदा च निस्स
हायतायाः पराकाष्ठा भवति
तदा यः समयाऽऽकुलत्वं
करावलम्बनेन त्वामुत्थापयति
स एव त्वमसि।
यदि कदाचित् स्यात् स्वच्छ
प्रतिमाऽपि दृश्येत तदा तस्या
दृष्टिपातेनावश्यानन्दं त्वम्॥
एतादृशी दृष्टिपातं कुरु
येनामरत्वं मनसोगोचरा
स्यादेवा प्रतिमा। यदि
कदाचिच्चरणावस्थायां
त्वयि स्यात्तदा तामनकारस्य

अवलम्बनं स्यात् तदा
कदापि ना जह्याद्।
समागमिष्यन्ति संसारेऽ
स्मिन्नानाविधा आपदः।
तव नाम नामवास्त्वा।
परित्यज्य गमिष्यन्ति।
स्नेहाधीना. सखायस्त्वां
दूरतोऽवलोकयिष्यन्ति।
मित्राण्यपि त्वामतिरस्कृ-
ष्यन्ति, परं दैवावस्थानेताऽ
स्मिन् करावलम्बनं ना
जह्याद्। भविष्यति यस्य
दुस्तर दुःखोदधितरणे
समर्थ इति।
भ्रात। संसारेऽस्मिन्
निजोऽयं पर इत्येवम्

दि.

देवगोष्ठी

कठिनं वर्तते। यदि परः स्वकीयत्वेन स्वीकृतस्तदा निरवधिपश्चात्तापो भविष्यति।

पश्चात्तापः! पश्चात्तापः! पश्चात्तापो न किमप्यस्ति।

अत एव कथनस्यावश्यकता भवति यत् पूर्वमिदमेव जानीहि यत् "कोऽसि त्वं?" "कोऽसि तव स्वजनः?"

(तरङ्गितहृदयात्)

अनुवादकः श्री विनोदयन्तुः

सुभाषिते

भवति हृदयहारी कोऽपि कस्यापि हेतु.
न खलु गुणविशेषः प्रेमबन्धप्रयोगे।
किसलयितवनान्ते कोकिलारावरम्ये
विकसति न वसन्ते मालति कोऽत्र हेतुः॥

* * * *

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो-
धन्यास्तदङ्गरजसा मलिनीभवन्ति॥

"आर्यसमाजः"

इदं तु स्पष्टमेव मत्कृतः स्मरणीयस्य महर्षेर्दयानन्दस्यार्यसमाजस्य स्थापनरूपप्रयत्न-उद्देश्यं वा सामाजिकोन्नतिधार्मिकोन्नतिरेवासीत्। यदा तेन भारतस्य वर्षस्य महती दुर्दशा दृष्टा तदा तस्य करुणामयं हृदयं तस्य दशामवलोकयितुं नाशक्नोत्। अतो नानुपालने प्रकारकार्यक्षेत्रे प्रवृत्तो बभूव। अथ वयं तस्य कार्याणां प्रयत्नानां च मूर्तरूपं पश्यामः - स आर्यसमाज एव। अधुना इदं प्रत्यक्षं जातं यदार्यसमाजो धार्मिकी संस्था। अस्याः प्रमुखं कार्यमस्ति धर्मप्रचारणम्। यदा धर्मे तस्योद्देश्यानां विकृतरूपाण्येवावशिष्यन्ते रूढिवादाख्य तथान्धविश्वास तदा तस्य समाजोऽपि विकारं प्राप्नोति। अतएव रूढिवादान् दूरीकर्तुं आर्यसमाजः प्रवृत्तो वर्तते।

कस्या अपि संस्थाया भवन्ति बहवो नियमाः नियमावितुं तस्याः सभ्यान्। न कोऽपि सभ्यस्तान् नियमानुल्लंघयितुं शक्नोति। एवं कस्या अपि धार्मिकसंस्थाया बहवो धार्मिकनियमा भवन्ति न कोऽपि तानुल्लंघयितुं समर्थः। आर्यसमाजस्य धार्मिकसंस्थाया अपि बहुनि

धार्मिककर्तव्यानि सन्ति।- षोडश संस्काराः, सन्ध्याग्निहोत्रे, वेदेषु, ईश्वरे च विश्वासो निराकारेश्वरोपासना, मूर्तिपूजाखण्डनादीनि। आर्यां धार्मिक-संस्थां धार्मिकरूपं त्वपरं वर्तनीयम् - तत्तु सर्वेषां कर्तव्यमेव। परं केवलं तस्यापि धार्मिकसंस्थाया धार्मिककृत्यान्येव, परं तस्या अन्यधर्मानवलम्ब्य संबद्धानि स्वदेशजातिहितरतानि सामाजिकानि कर्तव्यान्यपि भवन्ति। यथा- आर्यसमाजस्य दलितोद्धारे, विधवाविवाहे दरिद्राणां साहाय्यं, बालविवाह निषेधादीनि। इमानि - सामाजिककृत्यानि तु देशकालानुसारीणि। देशकालानुसारमेवेमानि समाचरितानि वृतानि च प्रामाण्यानि भवन्ति। अत इदं स्पष्टमेव यदिमानि कर्तव्यान्यकुर्वन्नपि कोऽपि पुरुष आर्यसामाजिकस्य। यतो हि न सर्वेषां सदृश्येव परिस्थितिः। विदेशगतस्तत्र - आर्यसामाजिकः कथमिमानि कर्तुं शक्तः। परमेतेषु सामाजिककार्येष्वपि बहून्यपरिहार्याणि यतो हि तेषामत्यन्ताभावोऽसंभवः। यथा मद्यपाननिषेधः। अस्य कार्यस्य निषेधे संभवः, परं नास्याः समूलोच्छेदिता।

अधुनायं प्रश्नः स्वाभाविक एव यद्देशकालानुसारेण सामाजिककार्याणि कर्तव्यानि, तदार्यसामाजिकाः पुरुषाः राष्ट्रसेवा-

आर्यसमाजः

मा भंगीभूते सत्याग्रहान्दोलने कथं न भागं गृह्णन्ति ? पूर्वोक्तं कथनं यदि वयं विचारयामस्तर्हि प्रश्नस्यास्योत्तरं नितरां सरलं जायेते । इत्येवोत्तरं यत्कोऽपि धार्मिकसामाजिकप्रवृत्तोऽस्मिन्मार्गं ग्रहीतुं स्वतन्त्रो न तत्र कापि विप्रतिपत्तिरस्माकम् । परं प्रश्नकर्तारो निगदन्ति यद्राजनीतिधर्मयोः साहचर्यम् । एतौ तु नितरां भिन्नौ आर्यसमाजस्तु धार्मिकी संस्था कथं तस्याः सदस्या अस्मिन्नान्दोलने भागं गृह्णीयुरिति । अत्रास्माकं विप्रतिपत्तिः सुस्पष्टमेव प्रतीयते यदयं त्वेव प्रश्नकर्तृणामिदं धारणा यद्राजनीति-धर्मौ न सहचारिणौ । यदि वयं विचारयामो-

यत्प्राचीनं ग्रन्थानां मनुप्रभृतीभिर्येनते राजनीतिधर्मयोः सहभावं नाङ्गीकुर्वन्ति, तत्र कस्यापि यत्पाश्चात्यानामेवायं प्रभावः । पाश्चात्यदर्शने धर्मोऽभिन्नत्वमेव प्रतिपादितम् । सर्व एव राजनीतिज्ञाः कुटिलानि कूटनैतिकानि कार्याणि कुर्वन्ति कथयन्ति च यद् राजनीत्यामेषां नितरामावश्यकता मात्र धर्मस्याधिकारः । बहुभिः प्रकारैस्तु राजनीति व्यवसायरूपेण स्वीकृता । अयमेव संसारे राजनीतिस्तस्य धार्मिकप्रकारस्य च पृथक् पृथक् स्थानम् । परमिदं परमिदं महत्त्वपूर्णमत्र गान्धी महोदयेन ह्यावधि स्वीकृत्य प्रदर्शितं यत् संभवो धर्मराजनीत्यो-

ह भारते । तस्य व्यक्तित्वे प्रभावेन सख्यं प्राप्तम् ।

अऽनार्यसमाजस्वरूपनिरूपणानन्तरं तस्य च कर्तव्य सम्पादनानन्तरमस्माकं मुख्य: प्रश्न: " परार्यसमाजेन समष्टिरूपेणास्मिन्नान्दोलने भागो ग्रहीतव्यो न वा " [illegible] जायते[illegible] । मया पूर्वमेवोक्तं यत् सामाजिकानि कार्याण्यकुर्वन्नपि प्रकाम आर्यसमाजी [illegible] । नावश्यकं यदसौ तान्येव कार्याणि कुर्यात् यान्यार्यसमाजेन निर्धारितानि परमन्यान्यपि कान्यपि सामाजिकानि कार्याणि कर्तुं सशक्नोति । यद्येवं तर्हि सर्व एवार्यसामाजिका, न केवलमार्यसामाजिका एव न, परमार्यसमाज । स्वयं कुत: सत्याग्रहान्दोलने भागं गृह्णाति । यथा दलितोद्धारादीनि कार्याणि नितरामावश्यकानि तथैव किल स्वराज्यप्राप्तिरप्यावश्यकी ।

परमिदं न मां समीचीनं प्रतिभाति यतो बहूनि कार्याण्यार्यसमाजस्याऽनाप्यवशिष्टानि । इदं सत्यं यत् कस्यापि धार्मिकसंस्थाया धार्मिककृत्यानि विद्यमान्यानि सर्वाण्यपि कार्याणि समयानुसारं परिवर्तनं लभन्ते ऽथवा समाप्तिं प्राप्नुवन्ति । परं नाऽनार्यसमाजस्य सर्वाणि कार्याणि जातानि समाप्तानि । आस्तां तावदयं विवाद: । अहं पृच्छामि यत् किं नावश्यकी स्वराज्यप्राप्त्यै सामाजिकोन्नति: । अहं तु मन्ये यत् सामाजिकोन्नतिरेवाधारभूतास्ति स्वराज्यप्राप्त्या: । अस्य कृतेऽ

शिक्षिता जना ये न जानन्ति "स्व-
राज्य" शब्दमपि। किन्तोर्दमस्मा-
कं कर्तव्यं यत्तेषामशिक्षां दूरीकु-
र्मः। अहं तु मन्ये यद् द्वे एव
कार्ये अद्यत्वे आवश्यके स्वराज्य-
प्राप्त्यै। कॉंग्रेसीय प्रकाशचा-
लयन्तु सत्याग्रहान्दोलनं, वयं सा-
माजिकोन्नतिं विधास्यामः।

श्री विनायकराव

न त्वहं कामये राज्यं,
न स्वर्गं ना पुनर्भवम्।
कामये दुःख तप्तानां
प्राणिनामार्तिनाशनम् ॥

ईश-स्मरणम्

प्रभो! त्वमेवासि ममाद्य त्राता लज्जा मदीयास्ति तवैव हस्ते ।

विपत्तिसिन्धौ नहि त्रायतेऽन्यः निराश्रयाऽन्ते त्वभिलष्यते दया ॥

मन्दा मतिर्मेऽस्ति विवेकहीना न वेद्मि तावत्कमहो महत्त्वम् ।

हानिं सदाऽपि चरणौ न सेवे आयुर्विनष्टं विषयप्रसक्त्या ॥

निराशयाच्चलमनाऽहं हि यदास्मि घोरा परिवारवर्गी ।

वीरश्च दस्येः परिलुप्यते यथा त्वमेव स्वामिन् शरणोऽधुना मे ॥

कामादिशत्रुभिरथाभिक्रम्यते भीतिश्च भूयोऽपि विधीयते तैः ।

बलेन हीनो भृशमद्य दूये स्वामिन् विपत्तिर्महती गरीयसी ॥

धर्मञ्च कार्यञ्च न विद्यते यथा मोहस्य जालान्न च मुच्यते स्वयम् ।

हिताहिते नैव विवेकशक्तिः पुत्रस्तवास्त्यद्य विपत्तिग्रस्तः ॥

निजा दया नाथ! प्रदर्शनीया क्षमामयो नाऽरथ प्रदेयः ।

क्रोडे स्वकीये उपवेशनीयः यस्मिन्स्थितस्यास्ति न दुःखलेशः ॥

ले० 'मधुरः'

नोट-: 'अब वेगि उबारो नाथ०' इत्यवलम्ब्य:

" कुलपते ! "

स्मरामस्त्वां दयामूर्तिं स्फुरत्कीर्तिं सदा याम ।

गुणाँस्तांस्तान् शुभाशुभान् सदानन्दस्य गायाम ॥

कथं संसारप्राचीरच्चिरात्संघर्षजेनेदम् ।

फलेनास्तं गुरोर्विश्वं सदा धीमानधीयानः ॥

स्मरेन्नामुं हि स्पष्टं सरस्वन्तं सुधीरत्नम् ।

स वेदोक्तिप्रचाराचारचातुर्यं प्रकुर्वाण ॥

क्रियारूपेण तानर्थान् श्रुतौ संकीर्तितान् स्वामी ।

प्रसंस्कुर्वन्नमून् पूर्वं पुनर्लोकेषु तन्वान ॥

मुदा संफुल्लकायो ऽपीषाणे सामाजिकेषुनार ।

स्खलद्भ्यः पातयन् संघातयन्नासीद् वयं नौमः ॥

सदा मन्युर्ममिश्रौस्तैर्वचोभिर्वशिन्नां चेतः ।

देवगोष्ठी

प्रसादाश्वासनोद्गारैः समुद्भावस्य सोपानः ॥

स त्यक्त्वा स्थापितं कूले कुलं कूलंकषायास्तट ।

नु चण्डीं चण्डिकापन्नां भवस्यानी महात्मान ॥

ततः संज्ञाततत्त्वो वैदिकी चर्या प्रचारार्थम् ।

बहि पिशात् समाजेभ्यो जनान् नेतुं कृतोद्यतः ॥

अये दीनान् कथं म्लेच्छान्परित्यक्तानहं कृत्वा ।

य उद्धार्यात्म संवेशे ध्वजं शुद्धेश्च धुन्वानः ॥

इदानीं श्रूयतां भद्राः कथं यात्रा कृता दीर्घा ।

कथं प्राणान् प्रियांस्तातः कृते शुद्धेर्न मन्वान ॥

न सोढो मुस्लिमैर्मूढैः कृतः संघातनोपाय ।

न दृष्टः को हितः कस्माहितः श्रिलाम कूरान ॥

कृत्वाऽऽहुतिं नु आत्मानिजदेहसंघम् ,

यज्ञेषु शुद्धिषु महान् खलु पारदृश्वा ।

अद्यापि तद् भवसि भूतलप्रीतिकरी,

मन्यामहे कुलपते ! प्रणयाम भूमा ॥

 "श्रीरामनाथ·"

"लूथर चरितम्"

इह जगति बहवो जनाः कृमि-कीटादिवत् यथा तथा जीवनं यापयन्तो जायन्ते म्रियन्ते च। न तेषां नामापि लोकैः स्मर्यते। परं कियन्त एवं विधाः पुरुषा भवन्ति ये स्व कार्यगरिम्णा गरीयांसं गिरिमपि, स्वगाम्भीर्येण गभीरमकूपारमपि लघयन्ति। तेषां यशः सौरभं तत् चन्द्रमसो-ऽप्यमृतमुत्पादयति। त एव प्रचलित-मार्गच्युतानां प्रथमतो वि-च्छेदकास्तथा च तिमिराच्छन्नलोको-पकृतौ नूतनपथप्रदर्शका भवन्ति।

एवं विधेषु अंगुलिगण्य-परिगणनीयेषु पुरुषेषु-लूथरोऽन्यतमोऽभवत्।

यूरोपीय महाद्वीप खण्डे खी-स्तीय मतस्य प्रमुखः प्रचारोऽभवत्। तत्र च तन्मतावलम्बिभिरनेकानि प्रार्थनामन्दिराणि निर्मापितानि तथा चेतस्ततः परिभ्रमद्भिः पाद-रीभिरपि तस्य प्रचारोऽत्यधिकं उत्साहेन कृतम्। शनैः शनैरेतेषां शक्तिरेतावन्मात्रं प्रवृद्धा यद्राज-नीतिचक्रमपि तेषां हस्तगतम-भूत्।

प्रारम्भे एते धर्माध्यक्षाः सदा-चारव्रतधारिण आसन्। अत एव च तेषां भूयान् प्रभावो लोकस्यो-

देवगोष्ठी

परि समभूत्।

रोमस्य प्रार्थनामन्दिरमखिले यूरोपमहाद्वीपे प्रधानं प्रार्थनामन्दिरमासीत्। अस्य धर्माध्यक्षस्याध्यक्षत्वे सर्वमेव यूरोपसाम्राज्यमासीत्। प्राक् षोडशख्रीस्ताब्दस्य कानिचिद्वर्षेभ्यः निम्नानि कारणानि समुपस्थितान्यासन्, यैः सर्वे देशा रोमदेशीयप्रार्थनामन्दिरधर्माध्यक्षस्य सत्तां विरोधिनोऽभूवन्।

तानि कारणानि संक्षेपतो निम्नलिखितानि सन्ति।

(i) रुहसिन्काले ते पोपाः, (धर्माध्यक्षाः) विषयवासनारतास्तथा च राज्याधिकारविलासमदगर्विताश्चासन्। ऐहिकेषु च जन्मं गुरवेमम ते परमभानन्दमन्वभवन्त। तेषां सदाचारादिभिः धर्मैः सर्वथा सम्बन्धविच्छेदोऽभूत्।

धर्माध्यक्षा तेभ्य उदानादिकं सर्वथा निषिद्धमेवासीत्, परं ते उपकारीत्या प्रत्यहं स्त्रीसंगरता एवासन्।

(ii) राजानस्तु इच्छन्ति स्म यत् इमे राज्ञां स्वराष्ट्रीयकृतेष्व[redacted]धिकारापेक्षया अधिकाः।

(iii) इमे पोपा उपाधिदान-मलिमपि नार्ईनवात्वे धर्मग्रन्थे लिखितं देवानामिच्छाम्। इतरच्च यदि-

कर्तुं निश्चयेन। परमाश्चर्यमेतदेव - साहित्य विज्ञान प्रसारेण लोके - श्वरस्य मनसो माधुर्यं सम्य- क्तया विज्ञातमासीत्।

एवं विधे कोपाभिनिवेश- कर्म संकटे जने व्याकुले जर्मनी देशे एकस्मिन् कृषक कुले लूथरः समजनि। तस्य पिता जातीयः यदयं बालो यूरोपस्य प्रकाशदिशां परि- वर्तयिष्यति। अस्य जनकः स्वीय- मभिलाषामासीत् यदयं मम पुत्रो नियम शास्त्रमधीत्य प्राड्विवाको भवतु। परं लूथरस्य तु जन्मत- एव धर्म विषयेऽभिरुचिरासीत्। लूथरेण सर्वेषां धर्मगुरूणां उत्कृष्टया ध्ययनाध्यापनं विहि-

तम्। विटनबर्ग विश्वविद्यालये मध्यात्म विद्याया उपाध्यायः समभूत्।

एकदायं स्वयं रोमं प्रति ययौ। तत्रापि च स्वयमेव पोपस्य कु- त्सितानि विचेष्टितानि स्वचक्षुषा- अवलोकितवान्। रोमन्यायालयं प्रति- ष्ठया वापस्या पोपस्य सर्वं कुकृत्यं सम्यक्तया समालोचितम्। स्वभाषया स्व प्रभावेणायं सत्वर- मेव सर्वत्र प्रसिद्धिमाप। लेख- या भाषया तथा व्याख्यानैरुपदे- शैः पोपं निनिन्द।

पोपस्तु प्रथमतो मौनं दधौ। परं यदा लूथर मतानुयायिनां प्राबल्यं समभूत् तदासौ लूथरं धर्माद्बहिष्कर्तु-

देवगोष्ठी

कार । परं नृपरेण नदीप्रमाणापक-
मापणमध्ये स्थापिताः कृतम् ।
एवं विवादः शनैः शनैर्वर्धे ।
राज्ञा धर्मस्य स्थाने विवादनिवा-
रणार्थैका संसत्समाहूता । नृपाः
समुद्रपूरे स्वस्वसभायां गन्तुं
प्रतिषिद्धाः । परमसौ स्वनिश्चयादे-
न निष्कासनं गत एव । राज्ञासौ
कोपविरुद्धं किमपि वक्तुं प्रतिषिद्धः
परं नृपरेणाज्ञा नाङ्गीकृता । एत-
स्मिन्नवसरे राज्ञासौ राष्ट्राद्बही-
ष्कृतः । तल्लिखितानि सर्वे ग्रन्था-
न्यग्निसात्कृताः । एतस्मिन्नवसरे
तस्य [redacted] अद्य पुस्तकस्य
रक्षणाय चिन्तापरा अभवत् ।
एकदा स्वसदनं प्रति निवर्तयन्तं

तं सैनिका निगृह्य निन्युः । सैनि-
सुरक्षितं एतं दैववशात् यदसौ
राज्ञा पातित एव । परं राज्ञा ते तौ
समाहूताः एव । एवं समरभूमौ -
राज्ञा धर्मग्रन्थं प्रकटितमाघाया-
मन्त्रविद्भुभाक्समन्ता, तत्र च देवा-
प्रतितो धर्मग्रन्थः ।

एवं तेन पापाचरणपापं येषां
तं विरुद्ध मान्दोलनं प्रारब्धं तथ-
च मतिमान् विश्व येऽसौ सम्पत्तीमभवत् ।
अत्र च कारणं तस्य वाक्यानुभव
धैर्ये स्यासीत् । मा कोऽपि तेन सार्धं
सम्भाषयेत् । असौ तस्य महाभूमौ-
त्रद् तदनुयायिन एतदनन्तर-
चद धर्मोपान्तरस्ततो अद्यस्य पुस्तकमा
पिहितमासीत् तदनेनास्माकं प्रतः

समाप्तं चरितम्।

लूथर महाशय पापिनोऽप्यधिकं सन्तापिताः। पोपाज्ञयैव जीवन्त एव दाहिताः। इत्थमत्याचार-प्रभावं सहमानैरपि लूथरमहाशय-पक्षपातिभिर्न स्वमतं परित्यक्तम्। राज्याधिकारिभिरपि बहुशः एषां विरोधः कृतः, परं तत्त्वनिष्ठैरेतैः स्वाधिकार रक्षणार्थं प्रयतमानै-रन्ततो गत्वा स्वाधिकारा लब्धा-एव।

धन्याः खलु ते जना ये सत्य-रक्षणाय सततं प्रयतन्ते तथा च सत्य रक्षणाय प्राणान् जहति परं न सत्यं जहति।

एवं विधानां पादैः भूयो-

पथि सद्भिरेव गन्तव्यम्।

श्री बालकृष्णः

सुभाषितम्

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्तु ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यते ऽस्ति मम कोऽपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥

अमृत-वाणी

सततं धाराकरालो ऽयं करवाल स्सत्याग्रहाभिधानः । सर्वैस्सर्वेषु सर्वथा च प्रयोज्य इति तु विशालितं विनिश्चितं वचः । यः कश्चित् स्वात्मनः समीहा-संमोदमानस्वान्त स्सं प्रयुनक्ति - सत्याग्रहमण्डलाग्रं स स्वीयेनैव शस्त्रप्रयोगेण तन्नामितो ऽपि मङ्गल-माचरति चरति च धीनीधारवीरोयं धर्ममिति विपश्चिदपश्चिमाः प्रमाणम् । प्रहारस्य च वीतिमत्तेन गूढेन गर्हेण च गूढे नात्मे कारणीकाणां पारस्पर प्रवृत्ते रमकारणे न च कथञ्चनापि रोगकारणवित वीतसेव भीतिरपि । प्रतिद्वन्द्वि प्रयोक्तरे च सत्याग्रह समर सन्नाह सज्जाः न तत्रा यतेन्ते वीराः । सत्याग्रहनरकरी धारर धारणाय न कस्यचन तेरो शक्य कता वरीवर्ति न च केनाऽपि सपत्नहतकेनाऽपहारेऽ ऽयमस्य कर्तुं पार्यते इति ।

× × ×

आस्तिक्य शेमुषी परिमुषित-मनो मालिन्य मयीनां साम्प्रतम् सर्वव्याप्ति सम्भव भावित भावनाकं विदित चर भेन अच्युत सनवतनु वत्सा गृह प्रगारभमनास्ताः देवं शरीर शरणमास्माकीनाना मीशिनः

अस्माकं कलेवरं कारागारे
कुर्वन्तु, हन्त मातृमन्दिरमलि-
नीकुर्वन्तु च सततं तथा च प्राण-
प्रहारकाठिन्येनाधिकमपि वितरन्तु
नैराश्यमपि शासकाः परन्तु -
मनांसि भारतानां स्वातन्त्र्यक्षि-
तिविलुप्ताः न तत्र कारागारा
अपि शराः गन्तुं समर्थाः।

× × ×

धर्मं चर। नहि इह पापधर्मं,
सत्यं वद। अपवद पापसत्यं
दीर्घदृष्टिं प्रसारय भूयास्त।
संकुचितदृष्टिरिति न कुत्र न
स्थानमपि नियमनीयम्।

× × ×

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम्

× × ×

गुरुणीनां नालीकनिःसृताः
गुलिकाः वक्षसि विधाय
विद्यार्थिनोऽपि सोत्साहं सहन्ते
इति तु न काठिन्यकठोरं वचः।
हन्त शान्तिदिनं पारस्परिककलह-
कालकलाकर्णनं दैन्य आश्चर्या-
भूतो मे हृदयः खिद्यति। काठिन्यजन्य
स्वात्मसंशोधन इति मैत्रीभावनापि
प्रमाणयन्ति।

× × ×

विद्वद्भिः परिसेवितं, साधुभिश्च
सुपालितं, वीतरागैश्च निषेवितं
स्वान्तेन च समनुमोदितं धर्मं
निबोध। मान्याः वन्द्याः धर्मशालिनः

× × ×

परोपकरणं पुण्याय परपीडनं
च पापायेति भारतीयं मनीषा
अलिखितं लपितम्।

— o —

"पराजयस्य विजयः"

जननी दीक्षयित्वं यति मोऽधर्मिणं. कृषीवलो लसन्तं क्षेत्रमवलोकयन्य- मानन्दमनुभवति, तमेव पिता- महो भारती. विलसन्तं वाजिन मवलोकयन्ननुबभूव। भग- वद्भक्तेरवशिष्टं कालं पिता महो वाजिने समर्पयामास। विजिह निखिलाश्व सौन्दर्यैः अभिभूतश्चैः भावो बलः सुल- तानो नितान्तं तं पितामहममो- दयत। स्वेन स्नेह स्निग्ध करेण भोजयंस्तं पितामहो भृशं प्र- सादमवाप।

विरहित निखिल साम्रा- ज्य सम्पत् विहित पौरजीवन

वृक्षः वाजि साम्राज्यशेषः स्वल्प कालावशेषाजीवितः बहुतुमनि वेषो बहिर्ग्रामस्य मन्दिरे सुखेन न्यवसत। तथापि प्रिय वाजि विरह वेदनां कथं कथ मपि सोढुं नाशक्नुव।" तदृते न मे जीवितम्" इत्युन्मत्त इव समये समये विललाप। प्रेयसस्तस्य चलनं वीक्ष्य स घडयङा शङ्- मनुजलधरे नृत्यत उन्मत्त मयूर इवाभवत्प्रमत्तो भारती। सर्व एव ग्रामीणा इमामाश्चर्य- करीं मोहगाथां जीवदन्तयो मध्ये स्वाकुलभयामिता इव समभवन्। यद्यपि केचिद्

ग्रामीणास्त्वं वद दृश्यापि द-
दृशुस्तस्यापि पितामहो न किं-
चिदपि चिन्तया ।

सायंकाले सुलतानारूढो
यावत्कालं पंचक्रोशमात्रं न
बभ्राम तावन्न कथमपि शान्ति-
माशिश्रिये ।

एकदा मध्ये ऽह्नि तज्जा-
नपदः लोके विख्यात चोर
कर्मा, नाम्ना खड्गसिंहः सु-
लतान कीर्तिं श्रावं श्रावं तद्दर्शन
लालसः प्राप्त पितामह कुटीरः
मुकुलीकृत करः सादरं सप्रश्र-
यं नमस्कृत्योपाविशत्तत्र च
तयोरेवमभूदालापः ।

" वत्स खड्गसिंह कथ-
मसि ? "

" (बद्धाञ्जलिः प्रणम्य) " तात
त्वत्कृपया सर्वमस्ति शुभम् "
" कथय कथमसि ह्यागतोऽसि "
" सुलतान दिदृक्षया कृत इहा-
गतोऽस्मि "
" अतुलोऽयं पशुः, दर्शन मात्रेणैव
प्रसादमवाप्स्यसि "
" सत्यम्, तस्य चलनमनस्ते
मोहयति "
" अद्वितीय सौन्दर्य इति मुहु
मुहुर्यशःश्रुतं मिति "
" यत्सत्यम्; एकवारमपि दृष्ट
दर्शनः कलेवरसि निहितमूर्ति
रेव नियते "
" चिरन्तना हि दृष्टा लालसाकुलो
ऽत्र समुपस्थितोऽस्मि "

तदनन्तरम् अभावेन मन्दुरां जग्मतुः। सगर्वं पिता महोऽश्व दर्शितवान्, साश्चर्यश्च खड्ग सिंहस्तं दृष्टवान्। यद्यपि खड्ग सिंहोऽश्व सहस्रं दृष्टवाँस्तथा पि [illegible] [illegible] [illegible] चेतसि खड्ग सिंह योग्योऽयम्। साधुरयं किमेते- नास्य प्रयोजनम्। एवं किञ्चित् कालं चित्रार्पित इव निःशङ्कः, लोकालोक इव निश्चलः स- चिन्तः, साश्चर्यः, सोद्वेगस्तस्थौ। तदनन्तरं बालस्वभाव सुल- भयाऽस्थिर चित्ततया प्राह ~~तदनन्तरं~~ "तातः चलनेऽदृष्टे सति न मया किञ्चिद्दृष्टमि- त्यहं मन्ये, अतोऽस्य चलनपाटवं दिदृक्षुरस्मि।

(२)

परमस्वाच्छुत सुलतान कीर्ति पल्लनिबद्धचेताः किन्- सिहजदनारनिन्द्यः पितामहो ना- ऽस्मानं क्षणमपि रोद्धुमशकत्। सपद्येव सपदि मन्दुरातो बहिरानी- य दत्त्वा पर्याणमुत्प्लुत्य च तत्पृष्ठमारुरोह। वायु प्रवाहे- णोड्डीयमानमस्य मनलोकमतः खड्ग सिंहस्य स्वान्ते सराग शार्षः। चौरः खड्ग सिंहो दृष्ट- सर्व वस्तुषु स्वाधिकारं मन्यमानः आत्मनाऽनधिकृतं सुलतानं द्रष्टुं क्षणमपि नापारयत्। अथ पिता मह! नायं त्वदधिकृतो भविते-

ति ॥ ऽच्चैरुच्चार्य बहिरगात्।

भारती भृशं बिभायाऽवति

क्षणं खड्गसिंहभयभ्रान्ता रात्रौ

धृतदौवारिकव्रतो निद्रामपि

न जग्राह। बहवो मासा व्यतीताः

परं खड्गसिंहो नाऽऽगात्।

पितामहोऽप्यधुनाऽऽगमनं दं-

स्तान्त दृष्टामनः सन्तापानरता

निःशङ्कोऽभवत्।

एकदा सन्ध्यासमये

प्रभातोदितनूतनकलिकेव

विकसितवदनः वाजिवर्ण

विग्रहाभ्यामुल्लसितचेताः

कुलतानारूढः पितामहो भ्रम-

णार्थं बहिर्ग्राममगात्। याव-

त्किंचिद्दूरमगात्तावदेक-

स्यार्दकस्य दीनस्य सकरुण-

क्रन्दितमश्रौषीत्।

"श्रीमन्तितोऽपि दृश्यतामिति"

सहसाऽश्रूयत ध्वनिः।

पितामहोऽत्र स्तम्भीभू-

त्वा तत्रैव तस्थौ। पार्श्वतश्च

संतापतापतप्तं रोगिणमेक-

मपश्यत्। किमस्य। कैमर्तु

ते हरी? तथा पृष्टा।

(बद्धकरसम्पुटः) "दयालो

दीने मयि दयस्व। इतः सौद्धिक

क्रोशपरिमितं रामपुरमस्ति

मया तत्र गन्तव्यं, वाजिनि

मामारोहय। प्रभुस्ते शुभं वि-

धास्यति।

"कस्त्वं ते"

"दुर्मदत्तो वै यस्य नाम भवता

श्रुतमेव, तस्याहं भ्राता।" पिता-

मुहुः स्वयमश्वादवतीर्य रोगिणं आरोढुमिच्छया करप्रसृतरश्मिरनु बब्राज।

सहसा सावेगं रश्मिः करादपगता, सच साश्चर्य-चकितः स्फूर्तिस्थिरदृष्टिस्तत्रैव विरराम। सम्मुखं च अपररोगिणं वाजिनोऽपहृत्यारि धावन्तं खड्ग-सिंहमवलोक्य भयविस्मयपूरितं चीत्कारशब्दमकरोत्। अथ किं-चिद्विचार्य्य चैवमुवाच "स्थीय-तामिति"।

खड्गसिंहो वचनमिदं नि-शम्य सहर्षं सत्वरमागत्य तत्क्षणमेव तस्थौ। सुलतानस्य कण्ठं सप्रेम करेण स्पृशन्नाह "पितामह! न साम्प्रतमेनं त्यक्ष्यामि

"वरं शृणु तात मे वचनम्"

एवं शोकसंतप्तमनाश्चिन्तित-चेताः विक्षुब्ध विरहवेदनः नयने पाशित करुणो बालक इव पितामह आत्मानमेव कथम् मन्दं मन्दम-वादीत् "सहिष्यं तव संरवणः" नाहं त्वां याचे, परं वत्स! प्रार्थना-मेकां मे स्वीकुरु, हन्त, अन्यथा न न जानितम्।

"तात! आदिश, आदेशं तव भालेन सार्द्धं शिरोधारिष्ये केवलं सुलतानं न दास्यामि"

"सुलतान विषये ऽधुना मा ब्रूहि, अस्मिन्वस्तुनि न मया वक्तव्यम्। ममेयं प्रार्थना यद् घटनेयं मा कस्यापि पुरतः कथनीया"।

"तात नयो मिरकस्याप्यार्ये

चकितः म्लानाननो न किंचिदप्य-
वादीदचिन्तयच्च, "मया त्वेनं
गृहीत्वा गन्तव्यं, परमुद्यानेऽनं
गोप्तुं तातादेशः, नानेन मे प्र-
योजन सिद्धिः" एवं सुचिरं
विचिन्तयता न किंचिदवाधारि।
अन्ततो गत्वा साहसं महत् स-
भयः पप्रच्छ "तात कस्तत्र
दोषो यस्माद्बिभेति भगवान्।
वत्स! उद्यानोऽयं नेत्स्य-
ति चेल्लोकास्तर्हि साधवो -
लोकेऽविश्वासभाजो भविष्यन्ति।
एवमुक्त्वाऽपरिचित इव
कुललानोऽपकृत्य दुरि मन्दिरं
प्रति न्यवर्तत। खड्गसिंहस्तु
तातादेशं स्मरन् विस्मयं ययौ।
आसीच्चास्य चेतसि, कीदृशा

अद्भुतस्तातस्य विचाराः सन्ति।
यत्प्रेमभाजनमवलोक्य तातस्य
कलोऽम्बुजमविकसत्। "[redacted]" अ-
स्माद्दूरेण मे जीवितमिति" आ-
भाषमाणो रात्रावप्याजागरीत्, यत्कृते
भगवद्भजनमप्यहासीत् तस्यैव
कृतेऽधुना चिन्तायाः शोकस्य च
लेशमात्रमपि नाद्राक्षत्; लोकाः
साधुषु निर्भयाऽविश्वासं मा कुर्यु-
रित्यासीच्चिन्तायाः शोकस्य च
मूलकारणम्। तातेन स्वदुःखं सु-
तस्य दुःखेन विसर्जितम्। नायं
मनुष्यः, देवः कश्चिदयम्।

३.

अथैकदा खड्गसिंहः पु-
ञ्जी भवत्सु तमोमयेषु नभ-
सि कुत्राजन निःशङ्कस्तिमिरे

निशीथे निगाढायां शर्वर्यां नर-
पतिर्वाजिरश्मिः साशङ्कः सभयः
शनैः शनैः पितामहमन्दिरं प्रविश्य,
यथास्थानं सुलतानं बद्ध्वा । निःशब्द-
द्वारं पिधाय बहिर्जगाम । बहि-
र्गच्छत एव तस्य द्वार्येव पश्चात्ता-
पाया श्रूण्यपतन् । ण्यपतन्

अथ यामिन्यास्तुरीये यामे
पितामहः उत्थाय कृतशिशिर-
सलिलस्नानः स्वप्नदृष्टस्थित
इव मन्दुरां प्रति चचाल । मध्य एव
ज्ञातभ्रमो यावन्निवर्तितुमारेभे ता-
वदेव प्रियतरः सुलतानस्य हेषाध्वनि
मश्रौषीत् । तदाकर्ण्य सावेगमन्तः
प्रविश्य पितेव चिरकालोपलब्धं
तनयं वाजिनं सस्नेहमालिङ्ग्य
चुम्बितं करोत् । अनन्तरं यावन्म-
न्दुराया बहिरगच्छत्तावदक्षिभ्यो
ऽश्रुप्रवाहः प्रवहितुं प्रचक्रमे । इत
ऽप्यश्रूणि हतस्पर्शेन भूमावपतन्
तत्र बहिर्गच्छतः खड्गसिंहस्या-
श्रूण्यपतन् । "श्री गुरुदेव"

इति

हा ! पद्मसिंह शर्मन् !

अत्र अध्यात्म [illegible]

[illegible]

[illegible]

अनभ्र-वज्रपातः

अकुल्यताशील[illegible]गिरास-
मेघ च हिन्दीसाहित्यस्य सृष्टि
स्तं संवीक्ष्य [illegible] भारतं
न सन्तोषेता, पं. पद्म-
सिंह शर्मणा सह कुलभा-
स्य चिरेण स्नेह उत्सवा
आसीत्। स हि खलन
आरभ्य [illegible]

पि समागताः [illegible] ऽस्माकं
मासने [illegible], [illegible]
खलु [illegible]
त्यागे ऽपि [illegible]
या, गम्भीरपाण्डित्ये ऽप्येवा-
लस्वभावं स्पृशन्तं मनो
विमनायत इव। परमात्मा
तस्यात्मानं शान्तिं प्रयच्छेत्।

आर्यसमाजस्य राष्ट्रिय कार्येण सम्बन्धः

मम सम्मतौ आर्यसमाजेन संघटनरूपेण राजनीतिकान्दोलने भागो न गृहीतव्यः । भागो न गृहीतव्य इत्यस्य नायमभिप्रायो विद्यते यदार्यसमाजेन राजनीतिकान्दोलनानां विरोधः कार्यः ये जना राजनीतिकान्दोलनेषु कार्यं कुर्वन्ति तेषां निन्दा कार्या। मे कथनस्य तात्पर्यमिदमेव वर्तते यदार्यसमाजेन एतादृशम् आन्दोलनेभ्यः सर्वदा पृथग् भवितव्यम् ।

देशहितैषिणः अधिकोत्साहशालिनो नवयुवकाः यद्यपिच्छन्ति यदार्यसमाजेनावश्यमेव राजनीतिकान्दोलने भागो गृहीतव्यः । यदि हि आर्यसमाजः देशसेवाकरणाद् एतादृशं स्वकर्तव्यं प्राप्यापि उपेक्षां कृत्वा तिष्ठति तदा तस्य जन्म एव निरर्थकं विद्यते। राजनीतिकान्दोलनात् पराङ्मुखेनानेन कोऽपि लाभ इति। परन्तु विषये ममेदं कथनं विद्यते यत् नवयुवकानामुत्साहमनुवर्तितुं नैव भवति शीघ्रमेव च शान्तिमाप्नोति ।

नवयुवका। अनिवार्यैव यद्यपि
यदार्यसमाजेन राजनीतिका-
न्दोलने भागो गृहीतव्यः।
वस्तुतस्तु आर्यसमाजः राज-
नीतिकान्दोलनेषु सहयोगं
कर्तुं न शक्नोति। आर्यसमाज
स्य मुख्यकार्यं विद्यते धर्म-
प्रचारः। परं राजनीतिकान्दो-
लनेषु कदाचिद्धर्मविरुद्धा-
न्यपि कार्याणि भवितुं शक्नु-
वन्ति। उदाहरणार्थं कस्मि-
श्चिद् हिंसात्मके राजनीतिका-
न्दोलने स्त्रीणां मानादरो भवितु-
महति। आर्यसमाजः स्त्रीणां
मानादरं सोढुं न शक्नोति।
वैदिकधर्मे स्त्रीणां केनापि

प्रकारेण स्त्रीणां मानादरो हिंसा
वा न कार्या। अत एव एता
दृश्यावस्थायामार्यसमाज
राजनीतिकान्दोलने कदापि
कर्तुं नार्हति। यद्यार्यसमाज
स्य एतादृशाय राजनीतिका-
न्दोलनस्य विरोधमेवाचरि-
ष्यति। केचिज्जनाः कथयन्ति
यत् आर्यसमाजस्य संस्थापके-
न महर्षिणा दयानन्देन वैदेशिक-
शासनं [illegible] कथितं
स्वानाम् तस्मिन् राज्ये सुखा-
नुकूलं प्रजानाम्। स्वदेशीया-
नां राज्यसम्भूतमितोऽस्माल
न तस्मिन् दुःखाकुलप्रजा-
नाम्।

अतएव महर्षेर्दयानन्दस्य
कथनमनुसृत्य आर्यसमाजेन
शीघ्रातिशीघ्रं स्वदेशस्य
भारतवर्षस्योत्कर्षं स्वातन्त्र्य
प्राप्त्यर्थञ्च महान् यत्न-कार्यः
भारतस्य स्वातन्त्र्यप्राप्त्यर्थमा
आर्यसमाजस्येदं मुख्यं
कार्यं विद्यते यत् सोऽवश्य-
मेव राजनीतिकान्दोलने भागं
गृह्णीयात्
यद्यप्येतत् सत्यं वर्तते यत्
वैदेशिक शासनं न कदापि
स्वीकर्तव्यं कथमपि संस्था
धर्मस्य नामधर्मनिपातो विद्यते
यत् बालविवाहनिषेधादि गुरु
तरं भारमनेनार्यसमाजेन राज-
नीतिकान्दोलनेऽपि भागः
गृहीतव्यः। अद्यत्वे आर्यसमाजो
न स्वदेशस्य भारतवर्षस्यो-
त्कर्षाय बहूनि कार्याणि स्व-
हस्ते गृहीतानि सन्ति। तानि
कार्याणि अपि सम्यक् पूरयितुम्
आर्यसमाजः साहाय्यं -
भवति। एतादृशामवस्थाया-
मार्यसमाज. कथं एवं स्वतन्त्रं
राजनीतिकान्दोलनस्वरूपकार्य
स्यां न समर्थः। यदि आर्य
समाज. राजनीतिकान्दोलने
भागं गृह्णाति तदा तस्येदं
कार्यमुचितं न प्रतीयते।
किञ्चार्यसमाज, एका धार्मिक
संस्था विद्यते, अत एव

अस्य मुख्यं कार्यं वर्तते। स्व-
धर्मस्य पवित्र वैदिकधर्मस्य
सर्वस्मिन् जगति प्रचार एव
अस्याः संस्थायाः अन्तिमम् उ-
द्देश्यं वर्तते। इदञ्च कार्यं
नातिसुकरं विद्यते। कार्यमिदं
परित्यज्य आर्यसमाजः ~~अन्यत्~~
~~[illegible]~~ किमपि कर्तुं न समर्थः।
केचिज्जनाः कथयिष्यन्ति
यत् आर्यसमाजः एतावत् स्वदेशो-
द्धारप्रभृतीनि कार्याणि
कुर्वन् अपि राजनीतिकान्दोलने
भागं ग्रहीतुं समर्थोऽस्ति।
यस्य हि समाजस्य मुख्यमुद्देश्यं
जगदुपकारकार्यं विद्यते स
एव. यदि [illegible]

राजनीतिकान्दोलनात् परा-
ङ्मुखो भवति तदा का नाम तस्य
राजनीतिकान्दोलने सहयोगं
करिष्यति। यदि हि आर्यसमाज
स्वदेशस्यैवोन्नतिं कर्तुं न समर्थः
यदि स वैदेशिकाक्रमणका-
रिभ्यः भारतमिदं त्रातुं न
समर्थः तदा कथं स सर्वस्मिन्
जगति शान्तिं सुखञ्च सम्पा-
दयिष्यति। यदि हि आर्यसमाज
सर्वस्य जगतः उपकारकरणं
मुख्यं कार्यं मन्यते तदा [illegible]
मेव भवितः तथापि भारतस्योद्धा-
य राजनीतिकान्दोलने भागो
ग्रहीतव्य इति।

श्री[illegible]:

आर्यसमाजस्य राष्ट्रियकार्येण सम्बन्धः

परमार्थिक विषये मैमेदं वाक्यं वर्तते यत् यद्यप्यार्यसमाजः जगदुपकारकरणं स्वं मुख्यमुद्देश्यं मन्यते तथापि अद्यापि इयं संस्था नाति विस्तृता वर्तते। अद्यापि आर्यसामाजिकानां संख्या अल्पा वर्तते। यद्यपि पञ्जाबादिषु आर्यसमाजेन पर्याप्ता उन्नतिः कृता विद्यते तथापि अद्यापि वैदिकधर्मानुयायिनः स्वल्पा एव सन्ति तत्र। अतएव आर्यसमाजोऽल्पसंख्यो [illegible]। धार्मिकं कुर्वन् अस्मदेकं राजनीतिकान्दोलनरूपं कार्यं कर्तुं न समर्थः। कथनस्य तात्पर्यमभिप्रायो वर्तते यत् केनापि वैदिकधर्मावलम्बिना राजनीतिकान्दोलने कार्यं न कर्तव्यम् परं कथनमिदमेवास्ति यत् साक्षात्तया आर्यसमाजेन संघटनरूपेण कार्यं न करणीयमासीत् राजनीतिकान्दोलने। अद्यापि वयं समवलोकयाम यत् सहस्रशः आर्यसामाजिकाः जनाः राजनीतिकान्दोलने कार्यं कुर्वन्ति। किन्तु एतदपि सत्यं वर्तते यदस्मिन् राजनीतिकान्दोलने आर्यसामाजिकानां जनानां पर्याप्तो भागो विद्यते परन्तु समाजः संघटनरूपेण कार्यं कर्तुं नार्हति।

श्री भारतभूषण

प्रेम

यदि हि भवच्चिन्तनाया मूले तत्त्वमासि
यैतै कस्याश्चिदपरस्य आत्मने उत्कण्ठा
संभवेत्, येन भवत् [illegible] हृदये उन्मत्त
तरं उत्कोष्ठ अनुभावना स्रोतः समुद्भवेत्
यत् भवतं धर्मे तथा सत्य पथे पद प्रचालने
प्रेरयेत्, यायं तथा दुःखवृत्ति तमो कुप
टनुं प्रभांशुः भवेत् तर्हि निश्चिन्दितमा
शङ्कितमिदं यत् भवत्कं प्रेम स्वकः प्रदीप
दीपो वर्तते। यस्याः कृत्स्नो ज्वालया
ज्वालितो यः प्रकाशरूपस्वरूपेण [illegible]
अखिलं लक्ष्यं प्रति भवन्तमाकर्षति,
स्वयं च अग्रे गच्छन् भवन्तमपि नयति
नयति। अरे प्रेम पथ प्रणामः १ नं प्रवर!
इदं प्रेम ज्योतिः स्व दीर्घमायुषं बिभाया
ज्योतिः स्फुलिङ्गं निर्मिरौधं प्रसर। त्वं सोद्देश्यं
लप्स्यसे। प्रेम इति अक्षरद्वय मात्रो ऽभिधान्
शब्दोऽतीव मधुरो मनोहरः सुन्दरश्च वर्तते।
सत्यं प्रेम चोभावपि समानार्थकौ। प्रेम
तु मानव ज्योतिः जीवन ज्योति वर्तते।
मानवीतायाः सत्यं स्वरूपं प्रेमैव विद्यते। य
यदपि लभति भवान् प्रेमान्वेषु जगति, यावत्
तावत् अप्रेम राशि यत् निश्चलं कस्य अनाथ
अशोकस्य पिपासा पार्श्वे। निःस्वार्थ स्व मधुरं
प्रेम संचितं विद्यते। कामस्य स्वार्थभावेन नि
वासविंं। आभानस्य प्रेमः स्वच्छ मग्नलोभ्य
